# संस्कृतवार्ताः

दिनाङ्क :-  01/11/2025                                        सायम्  - 06:20

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्रिणा श्रीमोदिना छत्तीसगढे चतुर्दशसहस्र-रुप्यतोऽप्यधिकानां परियोजनानां उद्घाटनं शिलान्यासश्च विहितम्।
- आन्ध्रप्रदेशे अद्य काशीबुग्गा-स्थिते श्री-वेङ्कटेश्वर-स्वामी-मन्दिरे जनसमर्द्देन नवजनाः मृताः।
- रक्षामन्त्री राजनाथसिंहः प्रावोचत् यत् एडीएमएम-प्लस् भारतस्य 'एक्ट्-ईस्ट्-नीतेः' तथा तस्य व्यापक-हिन्द-प्रशान्त-दृष्टिकोणस्य एकम् अभिन्नम् अङ्गम् अस्ति।
- लखनऊ-नगरं तावत् विशिष्ट-पाक-कलापरम्परायै यूनेस्को क्रिएटिव सिटी ऑफ गैस्ट्रोनॉमी इत्याख्येन सम्मानेन सभाजितम्।
- भारतेन बहरीन-नगरे पञ्चविंशत्यधिक-द्विसहस्रतमस्य एशियाई-युव-क्रीडासु अष्टचत्वारिंशत्-पदकानि सम्प्राप्य सर्वश्रेष्ठ-प्रदर्शनं कृतम्। इयं पदकसंख्या तावत् द्विसहस्त्रतमस्य नवम-त्रयोदशवर्षापेक्षया अत्यधिका वर्तते ।

---

<u>प्रधानमन्त्री-छत्तीसगढयात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य छत्तीसगढ़स्य यात्रावधौ नवा-रायपुरस्थले छत्तीसगढ़-विधानसभायाः नूतन-भवनस्य उद्घाटनम् अकरोत्। अत्रावसरे प्रधानमन्त्री पूर्व-प्रधानमन्त्रिणः तथा भारत-रत्न-विभूषितस्य अटल-बिहारी-वाजपेयीवर्यस्य प्रतिमामपि अनावृतवान्। उपस्थितं जनसमूहं सम्बोधयन्, प्रधानमन्त्री अवदत् यत् अद्य सम्पूर्णदेशः स्वकीयं न्यासं संरक्ष्य विकासमार्गे अग्रे प्रसरति। सः अवदत् यत् एष एव भावः केन्द्रीय-सर्वकारस्य प्रत्येकस्मिन् निर्णये तथा नीतौ च दृश्यते। प्रधानमन्त्री अवदत् यत् भारतस्य एषः दृष्टिकोणः छत्तीसगढ़-विधानसभायाः नूतन-भवने स्पष्टतया द्रष्टुं शक्यते, येन राज्यस्य समृद्ध-सांस्कृतिक-परम्परा प्रदर्श्यते ।

रायपुरस्य स्वीयायाः एकदिवसीय-यात्रावधौ प्रधानमन्त्री नवा-रायपुरे ब्रह्माकुमारीज़-संस्थायाः एवं शान्ति-शिखरस्यापि उद्घाटनं कृतवान्। एतत् केन्द्रम् तावत् आध्यात्मिक-शिक्षायाः, शान्तेः तथा ध्यानस्य एकम् आधुनिकं केन्द्रम् अस्ति। अत्रावसरे भाषमाणः प्रधानमन्त्री अवोचत् यत् राष्ट्रस्य विकासः तस्य राज्यानां विकासेन सह सम्बद्धः अस्ति। तेनोक्तं यत् अस्य मन्त्रस्यैव मार्गदर्शनेन सर्वकारः भारतं विकसित-राष्ट्रत्वेन निर्मातुं प्रतिबद्धोऽस्ति। प्रधानमन्त्री अवदत् यत् ब्रह्माकुमारीज़-सदृशाणि सङ्घटनानि एतादृशेषु प्रयासेषु महत्त्वपूर्ण- भूमिकाम् आविष्कुर्वन्ति।

इतः पूर्वं प्रधानमन्त्री नवा-रायपुरे श्री-सत्य-साईं-सञ्जीवनी-चिकित्सालयम् अवलोकितवान् यत्र सः दिल की बात इत्याख्येन कार्यक्रमेण सार्ध-द्वि-सहस्रबालैः सह वार्ताम् अकरोत्। जन्मनः हृद्-रोगैः पीडितानाम् एतेषां बालकानां चिकित्सालये निःशुल्कः सफलोपचारो जातः। अवसरेऽस्मिन् प्रधानमन्त्री बालेभ्यः "जीवनदान-प्रमाण-पत्राणि" प्रायच्छत्।

अद्य स्वीययात्रायां श्रीमोदी नवा-रायपुरे शहीद-वीर-नारायण-सिंह-स्मारकस्य तथा आदिवासी-स्वतन्त्रता-सेनानी-सङ्ग्रहालयस्य चापि उद्घाटनम् अवलोकनञ्च करिष्यति। प्रधानमन्त्री तावत् चतुर्दश-सहस्र-कोटि-रूप्यतोऽप्यधिकानां विकास-परियोजनानाम् उद्घाटनं शिलान्यासञ्च अकरोत्।

---

<u>आन्ध्रप्रदेशः</u>

आन्ध्रप्रदेशे अद्य श्रीकाकुलम्-जनपदस्य काशीबुग्गा-क्षेत्रस्य श्री-वेङ्कटेश्वर-स्वामी-मन्दिरे जनसमर्द्देन नवजनाः मृताः।

एषा घटना एकादश्यां तिथौ अभवत् यदा भक्तानां विशाल-जनसमूहः दर्शनार्थं समागतः । मृतकाः पलासा-काशीबुग्गा-क्षेत्रयोः समीपस्थ- निवासित्वेन संसूचिताः । व्रणिताः तावत् उपचारार्थं समीपस्थेषु चिकित्सालयेषु प्रवेशिताः सन्ति। राष्ट्रपति-पदासीना द्रौपदी-मुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् , प्रधानमन्त्री नरेन्द्रमोदी इत्येते श्री-वेङ्कटेश्वर-स्वामी-देवालयस्य दुःखद-घटनामालक्ष्य शोकं प्रकटितवन्तः । श्रीमोदिना मृतकानां परिवारेभ्यः द्विलक्ष-रूप्यकाणां व्रणितानां च कृते पञ्चाशत्सहस्ररूप्यकाणां अनुग्रहराशेः घोषणा कृता ।

---

## राजनाथः-आसियान

रक्षामन्त्री राजनाथसिंहः अद्य अवदत् यत् भारतं आसियान्देशैः तथैव प्लस्-देशैः सह स्वकीयं रक्षा-सहयोगम् क्षेत्रीय-शान्तौ, स्थिरतायां क्षमता-निर्माणे योगदानरूपेण पश्यति । श्रीसिंहः मलेशिया-देशस्य क्वालालम्पुर-नगरे आयोजिते द्वादशे आसियान्-रक्षामन्त्रिणामुपवेशने एतत् प्रख्यातवान् । सः सबलं प्रावोचत् यत् एडीएमएम-प्लस् भारतस्य 'एक्ट्-ईस्ट्-नीतेः' तथा तस्य व्यापक-हिन्द-प्रशान्त-दृष्टिकोणस्य एकम् अभिन्नम् अङ्गम् अस्ति। रक्षामन्त्रिणा एतदपि प्रकाशितं यत् भारतस्य हिन्द-प्रशान्त-सुरक्षा-दृष्टिकोणः रक्षा-सहयोगम् आर्थिक-विकासेन, प्रौद्योगिक-विनिमयेन मानव-संसाधनोन्नयनेन च च सह सम्बन्धयति संयोजयति।

---

## यूनेस्को लखनऊ

समृद्धायाः विविधायाः च पाककला-परम्परायाः च कृते लखनऊ-नगरं यूनेस्को-संस्थायाः सृजनात्मक-नगराणां सूचौ समाविष्टम्। उज्बेकिस्तानस्य समरकन्द-नगरे आयोजिते यूनेस्को-संस्थायाः त्रिचत्वारिंशत्तमे महाधिवेशणे एतस्मै नगराय पाककला-श्रेण्यां मान्यता प्रदत्ता। अनेन सम्मानेन लखनऊ-नगरं विश्वस्य सप्तति-पाककला-नगरेषु अन्यतमं जातम् सहैव हैदराबाद्-नगरस्यानन्तरं अनेन उपाधिना विभूषितं एतत् द्वितीयं भारतीयनगरं समभवत् । उत्तरप्रदेशस्य पर्यटन-संस्कृति-मन्त्रिणा जयवीर-सिंहेन अस्य निर्णयस्य स्वागतं कृतम्।

---

## स्थापना-दिवस:

राष्ट्रपतिः द्रौपदी-मुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च अद्य आन्ध्रप्रदेश- छत्तीसगढ-हरियाणा-कर्नाटक-केरललक्षद्वीप-मध्यप्रदेश- पञ्जाब-पुदुचेरी-राज्याणां जनेभ्यः राज्य-स्थापना-दिवसावसरे शुभकामनां प्रदत्तवन्तौ। सामाजिक-सञ्जालीयसन्देशे राष्ट्रपतिः मुर्मुः अवदत् यत् एते सर्वे प्रदेशाः देशस्य प्रगतये महत्त्वपूर्णं योगदानं प्रयच्छन्ति इति ।

---

## एशियाई-युवक्रीड़ा

बहरीन-देशस्य मनामा-नगरे आयोजिते पञ्चविंशत्यधिक-द्विसहस्रतमे वर्षे एशियाई-युव-क्रीडायां भारतेन भव्यं प्रदर्शनं कृतम्, तत्र तावत् भारतेन त्रयोदश स्वर्णपदकानि , अष्टादश-रजतपदकानि, सप्तदश-कांस्यपदकानि समेत्य आहत्य अष्टचत्वारिंशत् पदकानि अधिगतानि । इयं पदकसंख्या तावत् द्विसहस्रतमस्य नवम-त्रयोदशवर्षापेक्षया अत्यधिका आसीत्। द्वाविंशत्यधिक-द्विशतं भारतीय-क्रीडकेषु, उल्लेखनीय-क्षणेषु बालिकानां कबड्डी-दलेन भारताय प्रथमं स्वर्णपदकं अधिकृतम् । प्रीतिस्मिता भोइ इत्येषा भारोत्तोलने विश्व-युव-कीर्तिलेखम् अस्थापयत्, तदनन्तरं अन्तिमदिने मुष्टा-मुष्टि-क्रीडायां कुश्तीक्रीड़ायाञ्च सप्त-सुवर्णपदकानि प्राप्य अद्भुतं प्रदर्शनं कृतम्।

।। इति वार्ता:।।